UG/CBCS/B.A./Hons./3rd Sem./Sanskrit/SANCC7/2023

'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2023

## CC7-SANSKRIT (307)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

### विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च अधोलिखितेषु छन्दःसु ***द्वयोः*** सोदाहरणं लक्षणम् आलोचयत — 6×2 = 12

(क) इन्द्रवज्रा, (ख) मालिनी, (ग) रथोद्धता, (घ) शार्दूलविक्रीडितम्।

2. संस्कृतभाषया देवनागरीलिप्या च ***द्वयोः*** गणनिर्देशपूर्वकं सलक्षणं छन्दोनिर्णयं कुरुत — 3×2 = 6

(क) सा निन्दन्ती स्वानि भाग्यानि बाला।

(ख) हितं मनोहारि च दुर्लभं वचः।

(ग) तच्चेतसा स्मरति नूनमबोधपूर्वम्।

3. संस्कृतभाषया देवनागरीलिप्या च ***प्रश्नद्वयं*** समाधेयम् — 3×2 = 6

(क) किं नाम वृत्तम्? कतिविधं च तत्?

(ख) गणलक्षणविषये गङ्गादासकृता कारिका लेखनीया।

(ग) कोऽसौ छन्दोमञ्जरीकारः? तस्य कः संक्षिप्तः परिचयः?

### विभाग-ख

4. ***कस्यचिदेकस्य*** प्रश्नस्य उत्तरं प्रदेयम् — 12×1 = 12

(क) किं नाम रूपकम्? तस्य कति भेदाः? तेषु नाटकस्य लक्षणं सोदाहरणम् आलोचयत।

(ख) का नाम अर्थप्रकृतिः? अस्याः कति भेदाः? साहित्यदर्पणानुसारं तान् आलोचयत।

5. ***कस्यचिदेकस्य*** टिप्पणी कार्या — 6×1 = 6

मुखसन्धिः, नान्दी, अर्थोपक्षेपकः।

6. संस्कृतभाषया देवनागरीलिप्यां च ***त्रयाणां*** सलक्षणं सोदाहरणं व्याख्यां कुरुत — 4×3 = 12

यमकम्, उपमा, विभावना, निदर्शना, रूपकम्, अर्थान्तरन्यासः।

7. संस्कृतभाषयां देवनागरीलिप्यां च ***द्वयोः*** श्लोकार्थमालोच्य अलंकारनिर्णयः कर्तव्यः — 3×2 = 6

(क) क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्द्धते नित्यम्।
विरम प्रसीद सुन्दरि! यौवनमनिवर्ति यातं तु॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

(ग) कमलेव मतिर्मतिरिव कमला
तनुरिव विभा विभेव तनुः।

——×——



Maynaguri College Library